मन्त्रः। इन्द्राय यमाय वरुणाय धनदाय भूतवाय-
साय बलिं गृह्णातु मे स्वाहा ॥

"उदीर्य्य कार्य्यं स्वमथावहृत्य
ततः प्रदेशे करटस्य चेष्टाः
स्पृष्टीकृताङ्गानि शुभाशुभार्थं
संलक्षयेन्निश्चलपाणिपादः ॥
पूर्व्वेण खादन् सुखवित्तवृद्धिं
करोति वह्नेर्दिशि वह्निभीतिम् ।
काकोऽर्थनाशं दिशि दक्षिणस्यां
नैर्ऋत्यगो दिग्वरहत्यदिष्टः ॥
जलेशदेशेऽभिमतार्थसिद्धि-
र्व्वायोर्दिशीति प्रभवाल्पवृष्टिः ।
सौम्ये सुखारोग्यसमीहितार्थ-
मीशानदेशे वितरत्यभीष्टम् ॥
बलौ विलुप्ते करटः समन्तात्
कार्य्ये विमिश्रं परिभावनीयम् ।
बलिं विकीर्य्यापि न भक्षयन्ति
काकास्तदानीं भयदा भवन्ति ॥
क्षीरद्रुमारामचतुष्पदेषु
सरित्समीपे च्चिदशालयेषु ।
देयो बलिर्भूतदिनाष्टमीषु
कुल्माषदध्योदनतण्डुलाद्यैः" ॥

इति काकरुते पिण्डप्रकरणं सप्तमम् ॥ * ॥

"पिण्डत्रयस्याथ विधानमेत-
दाख्यायते यत् किल नारदाद्यैः ।
दृष्टं मुनीन्द्रैरशुभं शुभञ्च
यथावदस्मिन् कथयन्ति काकाः ॥
गत्वा शुभेऽह्नि प्रहरे चतुर्थे
देशेषु पूर्व्वप्रतिपादितेषु ।
नरेण पिण्डत्रयभोजनार्थं
काकाः प्रयत्नेन निमन्त्रणीयाः ॥
ततः प्रभाते ह्युपलिप्य भूमिं
तस्याञ्च पूर्व्वोदितमन्त्रयुक्त्या ।
ब्रह्माच्युतेशाप्यतिलोकपालाः
काकाश्च पुंसां क्रमतोऽर्च्चनीयाः ॥
दध्योदनाद्यैर्व्विहितं प्रवेश्य
पिण्डत्रये मण्डलकस्य मध्ये ।
अभ्यर्च्चयेदक्षतपुष्पधूपै-
र्मनोहरैर्यत्नपरो मनुष्यः ॥
तेषु क्षिपेत् प्रागिदगनुक्रमेण
पिण्डेषु हैमप्रथमे द्वितीये ।
रूप्यं तथा लौहलवं तृतीये
शेषञ्च कुर्य्याद्बलिपिण्डतुल्यम् ॥
त्रिःसप्तकृत्वो विनिवेश्य पिण्डे
पिण्डा निवेश्या बलिभोजनेभ्यः ।
मन्त्रोक्तमावाहनतोषितेभ्यः
कार्य्यं विचार्य्यापसरेत्ततश्च" ॥

मन्त्रः। ॐ हिलि टिमि विटि काकचाण्डालाय
स्वाहा । इति पिण्डाभिमन्त्रणार्थम् । ॐ ब्रह्मणे
विश्वाय काकचण्डालाय स्वाहा। काकाह्वानमन्त्रः॥

"काकेन भुक्ते ससुवर्णपिण्डे
श्रेयं नरैर्भोत्तममात्मकार्य्यम् ।



भुक्ते सरूप्ये खलु मध्यमं स्याद्-
भुक्ते सलौहे त्वधमं प्रदिष्टम् ॥
विवादवाणिज्यविवाहवृष्टि-
क्षेमाश्च वित्ताः कृषिभोगरोगाः ।
संग्रामसेवान्यकार्य्यदेशा
इत्यादयोऽस्मिन् परिभावनीयाः ॥
चेष्टामवामां विदधाति याति
प्रदक्षिणं दक्षिणपक्षमुच्चैः ।
ग्रीवां तथोच्चां कुरुते सशब्दः
स्थानं मनोज्ञं श्रयति द्रुमञ्च ॥
एवंविधां यो विदधाति चेष्टां
पिण्डं समादाय शुभं खगोऽसौ ।
अभीष्टकार्य्यादधिकं करोति
चेष्टाविपर्य्यासतयान्यथात्वम् ॥
पिण्डं समादाय यदि प्रधानं
शान्तं दिशं गच्छति काकपक्षी ।
पूर्णं फलं तत् कुरुते नराणां
चिकीर्षिते वस्तुनि यत्र तत्र ॥
काको गृहीत्वा यदि मुख्यपिण्डं
प्रयाति दीप्तां ककुभं तदानीम् ।
अत्युत्तमं कार्य्यफलं प्रदर्श्य
ततः समस्तं विनिहन्त्यवश्यम् ॥
द्वितीयकं यद्यपहृत्य पिण्ड-
मुड्डीयते शान्तदिगाश्रयेण ।
फलं तदानीं शुभदं नराणाम्
याप्यं खगो जल्पति कार्य्यजातम् ॥
काके समादाय जघन्यपिण्डं
याते प्रदीप्तां ककुभं वदन्ति ।
कार्य्यं जघन्यादधिकं जघन्यं
स्यान्मध्यमं मध्यमपिण्डभागे" ॥

इति वसन्तराजे पिण्डत्रयप्रकरणमष्टमम् ॥ * ॥

"महर्षयो वायसशाकुनस्य
वदन्ति सारादपि सारभूतम् ।
पिण्डाष्टकं यत्तदशेषमेत-
दाख्यायते कार्य्यविनिश्चयार्थम् ॥
शुभेऽह्नि काकानधिवास्य सायं
पिण्डाष्टकं भोक्तुमथ प्रभाते ।
तत्कालयोग्यानि समस्तवस्तू-
न्यादाय यायाद्बहिरप्रमत्तः ॥
एकान्तदेशे तरुपार्श्वभूमौ
मृद्गोमयाभ्यामुपलेपितायाम् ।
सत्पञ्चगव्येन समुक्षितायां
सौम्योपहारैरुपशोभितायाम् ॥
विधाय पूजां कुलदेवतानां
मध्ये ततोऽष्टस्वपि दिक्षु देयम् ।
भक्तेन सर्पिर्दधिमिश्रितेन
पिण्डाष्टकं प्रागिदगनुक्रमेण ॥
पक्षीन्द्रवह्न्यन्तकराक्षसेन्द्रान्
विष्णुं विरिञ्चिं धनदं महेशम् ।
पूर्व्वादिकाष्ठाक्रमयोजितेषु
न्यसेत् क्रमादष्टसु पिण्डकेषु ॥
नमोऽस्तु तेभ्यस्तान् प्रणवश्च सर्व्वां-



स्ततोऽर्च्चयेत्तन्निजनाममन्त्रैः ।
अर्घ्यासनालेपनपुष्पधूपै-
र्नैवेद्यदीपाक्षतदक्षिणाभिः ॥
अभ्यर्च्चितेभ्यो विधिनोदितेन
पिण्डाष्टकं तत् ददतु द्विजेभ्यः ।
मन्त्रेण संमन्त्र्य निवेदनार्थं
कार्य्यं विचिन्त्यापसरेच्च किञ्चित्" ॥

अथ मन्त्रः । ॐ नमः खगपतये गरुड़ाय
द्रोणाय पक्षिराजाय स्वाहा ॥

"द्रोणाढ़कसमं पिण्डं गृहाण त्वमशङ्कितः ।
यथादृष्टं निमित्तं च कथयस्वाधमे स्फुटम् ॥
काकेन पिण्डे प्रथमे गृहीते
तिष्ठन् व्रजन् वापि भवेत् कृतार्थः ।
उद्वेगशोकौ विफलः प्रयाणे
हानिः कलिर्व्वा भवति द्वितीये ॥
याम्ये रुगापद्भयमृत्यवः स्युः
पिण्डे चतुर्थे विजयो रणेषु ।
स्याद्वैष्णवेऽभीष्टमकष्टसाध्यं
भवेत् प्रवासो विफलश्च षष्ठे ॥
नास्तीह तन्निश्चयमेव कार्य्यं
भुक्ते न यत् सिध्यति सौम्यपिण्डे ।
सन्तापशोकौ विफला च यात्रा
पिण्डेऽष्टमे वायसभक्षिते च ॥
पिण्डं न गृह्णात्यथवा न भुङ्क्ते
चञ्चूनखैर्व्विक्षिपति द्विजो यः ।
कार्य्येषु सर्व्वेषु स न प्रशस्तो
ब्रवीति घोरं समरं स पुंसाम्" ॥

इति वसन्तराजे काकरुते पिण्डाष्टकप्रकरणं
नवमम् ॥ * ॥

"आद्यं पञ्चाशता द्वाभ्यां वृत्तैर्दिक्चक्रमीरितम् ।
काकालयपरीक्षा च द्वितीये दशभिस्त्रिभिः ॥
वृत्तैस्त्रिभिस्तृतीये च काकाण्डकनिरूपणम् ।
द्वाचत्वारिंशता वृत्तैर्यात्रा तुर्य्ये प्रकीर्त्तिताः ॥
वृत्तानि विंशतिस्त्रीणि स्थानं स्थाप्ये च पञ्चमः ।
स्वरप्रकरणं षष्ठं वृत्तैर्द्वादशभिस्ततः ॥
एकादशभिराख्यानं बलिसंज्ञञ्च सप्तमम् ।
पिण्डत्रयविधानाय चतुर्द्दशभिरष्टमम् ॥
पिण्डाष्टकविधानाय नवमे यदुदाहृतम् ।
अन्त्यप्रकरणं तच्च वृत्तान्येकादशैव तु ॥
वसन्तराजशाकुने सदागमार्थशोभने ।
समस्तसत्त्वकौतुके विचारितोऽत्र वायसः" ॥ * ॥

समुदायेन १८१ वृत्तानि । इति वसन्तराजशाकु-
नान्तर्गतवायसशाकुननामकाकचरित्रं समाप्तम् ॥

काकमांसगुणाः। दोषत्रयापहत्वम्। चक्षुर्हितत्वम्।
वृंहणत्वम्। बलायुर्हितकारित्वम्। लघुत्वम्।
दीपणत्वञ्च। इति राजनिर्घण्टः ॥

("काकः कोकिलसूकरास्त्वथ खरो-
ष्ट्राश्वादयो मत्कुका
व्यालाः सौरभयो वृकप्रभृतयो
ये चान्यजीवा नृणाम् ।
मण्डूकाश्च सरीसृपादिकगणा
यूका कलिङ्गाश्च ये